# Mantrasiddhiprada Mahadurga ShatanAma Stotram

# મન્ત્રસિદ્ધિપ્રદમહાદુર્ગાશતનામસ્તોત્રમ્

## Document Information

Text title : mantrasiddhipradamahAdurgAshatanAmastotram

File name : mantrasiddhipradamahAdurgAShTottarashatanAmastotram.itx

Category : devii, aShTottarashatanAma, durgA, devI

Location : doc_devii

Proofread by : NA

Description/comments : See corresponding Namavali

Source : Mundamala Tantra paTala 4 shlokAH 10-24

Latest update : January 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2021

*sanskritdocuments.org*

# મન્ત્રસિદ્ધિપ્રદમહાદુર્ગાશતનામસ્તોત્રમ્

ॐ દુર્ગા ભવાની દેવેશી વિશ્વનાથપ્રિયા શિવા ।
ઘોરદંષ્ટ્રાકરાલાસ્યા મુણ્ડમાલાવિભૂષિતા ॥ ૧॥

રુદ્રાણી તારિણી તારા માહેશી ભવવલ્લભા ।
નારાયણી જગદ્ધાત્રી મહાદેવપ્રિયા જયા ॥ ૨॥

વિજયા ચ જયારાધ્યા શર્વાણી હરવલ્લભા ।
અસિતા ચાણિમાદેવી લઘિમા ગરિમા તથા ॥ ૩॥

મહેશશક્તિર્વિશ્વેશી ગૌરી પર્વતનન્દિની ।
નિત્યા ચ નિષ્કલઙ્કા ચ નિરીહા નિત્યનૂતના ॥ ૪॥

રક્તા રક્તમુખી વાણી વસ્તુયુક્તાસમપ્રભા ।
યશોદા રાધિકા ચણ્ડી દ્રૌપદી રુક્મિણી તથા ॥ ૫॥

ગુહપ્રિયા ગુહરતા ગુહવંશવિલાસિની ।
ગણેશજનની માતા વિશ્વરૂપા ચ જાહ્નવી ॥ ૬॥

ગઙ્ગા કાલી ચ કાશી ચ ભૈરવી ભુવનેશ્વરી ।
નિર્મલા ચ સુગન્ધા ચ દેવકી દેવપૂજિતા ॥ ૭॥

દક્ષજા દક્ષિણા દક્ષા દક્ષયજ્ઞવિનાશિની ।
સુશીલા સુન્દરી સૌમ્યા માતઙ્ગી કમલાત્મિકા ॥ ૮॥

નિશુમ્ભનાશિની શુમ્ભનાશિની ચણ્ડનાશિની ।
ધૂમ્રલોચનસંહારી મહિષાસુરમર્દિની ॥ ૯॥

ઉમા ગૌરી કરાલા ચ કામિની વિશ્વમોહિની ।
જગદીશપ્રિયા જન્મનાશિની ભવનાશિની ॥ ૧૦॥

ઘોરવક્ત્રા લલજ્જિહ્વા અટ્ટહાસા દિગમ્બરા ।
ભારતી સ્વરગતા દેવી ભોગદા મોક્ષદાયિની ॥ ૧૧॥

ઇત્યેવં શતનામાનિ કથિતાનિ વરાનને ।
નામસ્મરણમાત્રેણ જીવન્મુક્તો ન સંશયઃ ।
પઠિત્વા શતનામાનિ મન્ત્રસિદ્ધિં લભેત્ ધ્રુવમ્ ॥ ૧૨॥

ઇતિ મન્ત્રસિદ્ધિપ્રદમહાદુર્ગાશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

મુણ્ડમાલાતન્ત્રાન્તર્ગતમ્ ચતુર્થે પટલે શ્લોકાઃ ૧૦-૨૪

---

*Mantrasiddhiprada Mahadurga ShatanAma Stotram*

pdf was typeset on January 14, 2021

Please send corrections to *sanskrit@cheerful.com*